नं. ४८०१

नाम - स्नानसूत्र परिशिष्ट भाष्यं स्नानविधिसूत्रविवरणम्

कर्ता - अग्निहोत्रि हरिहरः

पत्र २२ पकाभि सं. १९४३

विषय: सूत्रपद्धतिः

स्नान सूत्र परिशिष्ट भाष्यं
स्नान विधि सूत्र विवरण

कात्यायनस्नानविधिसूत्रव्याख्या

४८०१

कात्यानकृतस्नानसूत्रं भाष्यविभूषितम्
गङ्गाधरेण महताश्रमेणेदं सुशोधितम् १

॥हरिहरभाष्यमेतत्कात्यायनप्रणीतस्नानसूत्रीयम्॥
अस्य श्लोकसंख्या ५०४॥

अंघ्रिकमलं जलं गांगं स्नान

ह. १

ओं प्रणतोऽस्मि हरेरंघ्रिसरसीरुहमादरात् यज्जगत्पावनं पाथः प्राहोष्टामरसैन्यवम् १ कात्यायनकृतस्नानविधेर्व्या
ख्यापुरस्सरम् वियास्येपद्धतिं विद्वत्सदाचारद्विजप्रियाम् २ अथातो नित्यस्नानम् १ अथ श्रौतस्मार्त्तक्रियानुविधानानन्त
रं यतस्ताः क्रियास्स्नानपूर्विकाः अतो हेतोर्नित्यसन्ध्योपासनपंचमहायज्ञादिनित्यक्रियानुष्ठानाधिकारसंपादकत्वेनावश्य
कं स्नानं बहिस्सर्वांगजलसंयोगो विधास्यत इति सूत्रार्थः तत्स्नानं कुत्र कार्यमत आह नद्यादौ २ नदी आदिं प्रथमामुख नित्यपेक्षायां
ख्यायस्य स्नानाधिकरणस्य देवखाततडागसरोगर्तह्रदप्रस्रवणादेः कृत्रिमजलाशयस्य सनद्यादि तस्मिन्नद्यादावकृ
त्रि मे जलाशये स्नानं कुर्यादिति यावत् तत्र नदीकूलद्वयान्तर्गतयोजनाधिकभूभागप्रवाहिसलिला लोके नदीशब्देन प्रसिद्धा देवखातो
देवनिर्मितत्वेन प्रसिद्धो ब्रह्मह्रदादिः तडागो गदालोलप्रभृतिः सरउत्तरार्कदण्डखातादि गर्तो योजनभूभागपर्याप्त
जलप्रवाहः ह्रदोऽगाधोऽशोष्यो जलराशिरवस्थितः प्रस्रवणं पर्वतादेस्स्रवनः प्रस्रुतो निर्झरः अकृ मासंभवेपेवम् १
त्रि

यतो याज्ञवल्क्यः पञ्च पिण्डाननुद्धृत्य न स्नायात्परवारिषु इति

त्पिण्डोद्धरणपूर्वकं तत्रैव पिण्डजलाशये स्नानं कुर्यात् २ एवं स्नानं तदधिकरणं चानुविधायेदानीं स्नानोपकरणाहरणपूर्वकं स्नानेतिकर्तव्यतां विधातुमुपक्रमते मृद्गोमयकुशतिलसुमनसश्चाहृत्य मृद्गोमयं च कुशांश्च तिलांश्च सुमनसश्च मृद्गोमयकुशतिलसुमनसस्ता आहृत्य स्वयमानीय शूद्रादन्येन वा आनाय्य मृदं शुचिदेशस्थां शर्करास्थ्यादिरहितां मार्जारमूषकोत्खातवल्मीकपांशुकर्दमवर्जिताम् गोमयं चारोगिण्यादिगवीशकृत् कुशान् सदादिशुचिदेशोत्पन्नान् समूलान्साग्रान्दर्भान् तिलान्कृष्णपक्वान् कृष्णपक्वान्वा सुमनसः पुष्पाणि सुगन्धीन्यगन्धानि प्रतिषिद्धवर्जितानि शतपत्रिकादीनि बिल्वतुलसीप्रभृतिपत्राणि च ४ उदकान्तं गत्वा शुचौ देशे स्थाप्य उदकस्य समीपे कूपस्य नद्यादिसरः वन्धिनीं तत्समीपे गृहा ... वा आप्य तत्राप्युपद्रवरहिते प्रक्षालनादिना शुचौ शुद्धे देशे वस्त्रासनं ततो हि नायां भूमौ स्थाप्यानि यानि मृदादीनि अत्रासमासे पिल्पवादेशश्छान्दसः छन्दोवत्सूत्राणि भवन्तीति वचनात् ५ प्रक्षाल्य पाणिपादम् प्रक्षा

आरण्यागत्राभ्यान्वा

ल्पमृदाजलेनद्वैर्दैर्घेणक्षालयित्वा किम् पादौचपाणीचपाणिपादम् द्वन्द्वश्चप्राणितूर्यसेनांगानामितिसूत्रेणैकवचनम्
ह॰ २ अत्राग्र्यंतत्वात्पाणेयारभ्यहिंततात्वपाणिशब्दस्यपूर्वनिपातः तेनविशेषदक्षिणमादौपक्रमेणपादौप्रक्षाल्यतथैवपाणिप्रक्षा
लयेत् नतुपाठक्रमेण दे कुशोपग्रहोबद्धशिखीयज्ञोपवीत्याचमेत् कुशाश्चिप्रभृतयोदर्भलं प्रग्रहस्सव्यहस्तेधृतोयेन
सकुशोपग्रहः उपग्रहः पवित्रमप्युपलक्षयति सव्यस्योपग्रहः कार्योदक्षिणस्यपवित्रकइतिस्मृतेः तेनानंतगर्भसाग्र
प्रादेशमात्रदर्भदलद्वयात्मकपवित्रालंकृतदक्षिणहस्तस्सकुशोपग्रहान्वितसव्यहस्तस्तन्बद्धाशिखाचूडायस्यास्तीतिबद्ध
शिखी यज्ञोपवीतंब्रह्मसूत्रमस्यास्तीतियज्ञोपवीती अत्रसदोपवीतिनाभाव्यंसदाबद्धशिखिनचेतिकात्यायनस्मृतेर्बद्धशि
खित्वयज्ञोपवीतित्वेपुनर्वचनंकेशवेयोत्तरीयवाससोर्निहत्यर्थं यत्तुप्रेतस्पर्शिनांस्नानपकवस्त्राः प्राचीनावीतिनइतिपा
रस्करगृह्यस्मरणम् तत्स्नानोत्तरेहिवस्त्रतात्पर्यकम् यत्तोत्राशुचिस्पर्शादिनिमित्तकेस्नानेसवासाजलमाविशेत् इत्या २

दिवचने: प्रेतस्पर्शिनामपि स्नानेनैकवस्त्रताप्राप्तौ न स्तुनरनेकवस्त्रतापरिसंख्यानार्थम् नपुंस्त्वद्यतिरिक्त स्नाने द्विवस्त्र
ता स्नापकम् यतो वदन्ति निष्पी[illegible] वस्त्रमित्येकवचनम् योगियाज्ञवल्क्योपि निष्पी[illegible] स्नानवस्त्रं त्विति स्नानवस्त्रस्यैकत्वंस्म
रति श्रुतोयज्ञोपवीतीति पुनर्वचनमन्तरीयपुरुदासार्थम् तस्मान्नैमित्तिकस्नाने नैकवस्त्रतानिषिद्धेति ास्थितमिति केचित्
तदयुक्तम् नाईमेकञ्चवसनंपरिदध्यात्कथंचनेति पुरुषस्य सर्वदैकवस्त्रनिषेधात् वस्त्रद्वयधारणस्य नियमात्स्नानका
लेनत्यरित्यागेप्रमाणाभावात् सचस्त्रोऽहरहरा[illegible]स्येति वचनेद्वितीयप्राप्त्यर्थम् नग्नस्ना[illegible]कवस्त्रस्यप्राप्तत्वात्स्नानानेन त[illegible]
मेति [illegible] मृद्गोमयं [illegible] रं न गात्रमन्त्रं ज्यानुशिरोविधुनु:
यात्रवासोविपुनुयान्त्वोत्तरीयविपर्यासंकुर्यादिति सांख्यायनहारीतवचनाच्च स्नानकाले द्विवस्त्रनियमात् नैकवस्त्र:
स्नायादितिवचनाच्च वासोभिरिति वचनं वक्रत्वेन द्वित्वस्य स्नानवस्त्र मिति विवेकत्वमविवक्षितम् यज्ञोपवीत्यनुवादेनोत्त

न प्रतिषेधो वै = ४

ह॰ २

रवस्त्रनिषेधार्थन्तदन्यत् तस्मादुत्तरीयवस्त्रवर्त्तैवस्नातव्यम् ग्राचम्य यथाशास्त्रमाचमनेकृत्वा ७ ॐ उरु ॐ ह्रीन्तितोयमा
मंत्राचर्त्तये प्रेतेशान्तमिति ॐ उरु ह्रीं ह्रीत्यनयाऋचातोयपञ्जलमामंत्र्याभिमुखीकृत्य प्रेतेशान्तमित्यनयाऋचातत्तोयन्दक्षिण
हस्तेनप्रदक्षिणमावर्त्तयेत्सकृदालोडयेत् ॥८॥ सुमित्रियानइत्यपोञ्जलिनादायदुर्मित्रियाइतिद्वेष्यंप्रतिनिषिंचेत् सुमि॰
त्रियानइतियजुषाऽपोञ्जलिनाकरद्वयपुटेनादायोत्सृत्यदुर्मित्रियास्तस्मैसन्त्वितियजुषाद्वेष्यंशत्रुंप्रतिनिषिंचेत् शत्रुमन
साध्यातामहंमौप्रदीयते द्वेर्थः द्वेष्याभावेकामादिरिपुवर्गात्मनसाध्यातानिषिंचेत् ॥९॥ कटिंवस्त्रंजंघेचरणौकरौमृदा
त्रिस्त्रिः प्रक्षाल्य कटिर्नाभेरधःपृष्ठवंशस्यचसमंतात्तस्याधोभागं वस्तिगुदमेढ्रयोरन्तरालम् ऊरूवस्तितोधस्ताज्जानु
पर्यंतौ ॥ जंघेजानुनोरधस्तात्गुल्फपर्यन्ते ॥ चरणौगुल्फयोरधस्तात्तलमभिव्याप्यपादौ ॥ करौमणिबंधादारभ्यान्तर्वहिरंगुल्य
ग्रावपि ॥ मृदासव्यहस्तगृहीतयाकटिंसकृदालिप्यप्रक्षालनेसामर्थ्यादद्भिस्सकृत्प्रक्षाल्यतथैवद्वितीयंतथैवतृतीयंकटिं ३

र=२

प्रक्षालयित्वैवमेवत्रिर्वालिप्रभृतीनि क्रमेणैकैकशः प्रक्षाल्य ॥ ततो नमस्योदकमालभेदंगानि मृदेदं विष्णुरिति क्र=२
कृद्यायथमांगप्रक्षालनसंभवप्रायश्चित्तशुद्ध्यर्थमाचमनं कृत्वोदकायनमइत्युदकन्नमस्यनत्वेदं विष्णुरिति मन्त्रपादवाद
दक्षिणपाणिनागृहीतया मृदा मुखमारभ्य नाभिपर्यन्तानि सव्यहस्तस्थया मृदा नाभिमारभ्य पादपर्यन्तान्यंगानि गात्राण्या
लभेदनुलिंपेत् अत्र नमस्यतिशब्दात् सोल्पवत् आलभेदिति परस्मैपदं शब्दात् स्वयम् छन्दोवत्सूत्राणि भवन्तीति वचनात् ॥
सूर्यस्याभिमुखो मज्जेत् न तत्पूरणकैर्जलाशये प्रविश्य नाभिमात्रे जले स्थितः सूर्यस्याभिमुखस्तन्मज्जेत् शिरसा
जलमावहेत् इदं कातीयमतम् ॥ यत्तु प्रवाहाभिमुखो मज्जेदिति स्मृत्यन्तरम् तदन्यशाखीयविषयम् ॥ ननु कात्यायनव
चनं स्थावरजलस्नानविषयम् स्मृत्यन्तरं प्रवाहस्नानविषयमिति व्यवस्था किन्न स्यादिति चेन्नैवम् यतः कात्यायन
स्नानन्त्वापादावित्युपक्रम्य सूर्यस्याभिमुखइति सामान्यतः स्मरति ॥ याज्ञवल्क्योपि भास्कराभिमुखो मज्जेदिति स्मरति
भिमज्जेदि=१

ह्र ५ तस्मात्कात्यायनयाज्ञवल्क्ययोर्मतानुवर्तिनां वाजसनेयशाखिनां सर्वत्रोदकाप्राये स्नाने सूर्याभिमुखत्वम् १२ मज्जने प्रका
रमाह आपो अस्मानिति स्नातो दिदाभ्य इत्युन्मज्य निमज्ज्योन्मज्याचमय आपो ऽ अस्मानित्यनेन मंत्रेण स्नात्वा मज्जित्वा·
उदिदाभ्य इति मन्त्रान्ते उन्मज्य उत्क्रम्य स्नायात् पुनस्तस्मीन्निमज्य स्नात्वोन्मज्य तस्यैवोत्क्रम्याचम्योपस्पृश्य १३ ॥ गोमये
न विलिंपेन्मानस्तोक इति मानस्तोक इति स्वादद्क्षिणकरगृहीतेन गोमयेन मूर्द्धप्रभृतिनाभिपर्यंतं ॥ वामहस्तगृही
तेन नाभ्यादिपादपर्यंतं शरीरं विलिंपेत् रौद्रमंत्राभिधानादुदक[illegible]स्पर्शः ॥ १४ ॥ ततोऽभिषिंचेदिमम्मेवरुणेति वतस्त्रभि २
र्मापउत्तमं मुंचत्वनुत्वेति ततो गोमयानुलेपनानंतरं दक्षिणचुलकगृहीतेनोदकेनेमम्मेवरुण इत्येवमादिभिः
नस्तृभिः सूत्रपाठक्रमेण पठितैर्दशाभिर्मंत्रैः प्रतिमंत्रमभिषिंचेत् मूर्द्धानमञ्जलिना सिंचेत् अत्रपाठादेवगोमयानुले
पनानन्तरमभिषेकप्राप्तौ तन्तंशब्देनानुलिप्तगात्रस्यैवाभिषेक इति गम्यते १५ अतैवैतत् एतदपूर्वाभिषेचनमंतेवम ८

वति सन्निधौ [illegible] तरत्रानुष्ठेयस्य पावनस्यान्तरमर्थः १६ निमज्जेयान्मज्ज्यावस्यदर्भैः पावयेत् निमज्ज्यन्तस्मी
स्नात्वा वस्य स्नानानन्तरं विहितमाचमनं कृत्वा दर्भैस्त्रिभिः कुशलवैर्दक्षिणहस्तगतैः प्रादक्षिण्येन नाभेरूर्ध्वं पुनर्ना
भिं यावत्पावयेत् १७ पावनस्य माख्यानान्यावनमन्त्रानाह आपो हि ष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीरापश्च ुतिद्वा
भ्यामपो देवा द्रुपदादिव शन्नो देवीरपो [illegible] रसमयो देवीः पुनन्तु मेति नवभिस्त्रिसप्ततिर्मन्त्रैः ओंकारेण व्याहृतिभिर्गायत्र्या वा
दावन्ते वं आपो हि ष्ठेत्यादिभिस्त्रिसप्ततिर्मन्त्रैरन्तैर्मन्त्रैः पावयेदित्यर्थः किंवोंकारेणच एवेन व्याहृतिभिर्भूरित्यादितिसृभि
र्गायत्र्या वा तत्सवितुरित्येतया पावयेत् क्व च आदौ आपो हि ष्ठेत्यादेः पाव[illegible]नस्य तथान्ते वा वित्सतिर्मन्त्रस्यावसाने १८
अन्तर्जलेऽघमर्षणेन त्रिरावर्तयेत् अन्तर्जले जलस्य मध्ये निमग्नस्सन्नघमर्षणमृतञ्च सत्यञ्चेत्येतत्सूक्तं त्रिवारमाव
र्तयेदनुच्चस्सञ्जपेत् १९ द्रुपदादिवायं गौरिति वा तद्विष्णोः प्राणायामं वा सशिरस्समोमिति वा यद्वा द्रुपदादिवेत्यादिकाम्

सशिरसं

वमायेगोविन्दादिक्रमेणमन्त्राणांयामंवावर्त्यमानलक्षणम् कथंभूतं सशिरसंसहवर्तमानम् आपोज्योतिर्मंत्रशिरः एते
ह॰ नशिरोरहितोऽपिप्राणायामोस्तीतिगम्यते ओंमितिवाऽन्तर्जलेत्रिरावर्तयेदित्यनुषंगः अत्रैतेषांपक्षाणांशक्तिश्रद्धापेक्ष
५ याविकल्पः उत्तमाधिकारिणंप्रत्याह विष्णोर्वास्मरणम् विष्णोः परमात्मस्वरूपस्यसर्वव्यापकस्यस्मरणंध्यानंवाकुर्यादि
5 त्यर्थः २ इतिस्नानविधेःप्रथमकण्डिकासूत्रार्थः ततःकिंकुर्यादित्यतआह उत्तीर्यधौतेवाससीपरिधाय एवमुक्तविधि
नास्नात्वोत्तीर्यजलाद्बहिर्निष्क्रम्यधौतेऽरजकप्रक्षालितेमृदप्यम्बुभ्यांशुक्लेऽनग्निदग्धेऽछिन्नेऽस्यूतेऽमलिनेगैरिकादिरा
गरहितेकार्पासेवाससी अन्तरीयोत्तरीयेद्वेवस्त्रेपरिधायवसित्वा अत्रपद्यावारम्यपरिधानस्यविन्यासविशेषः प्रान्तद्वयगो
पनेनसूक्ष्मेन) धौताभावेशाणक्षौमाविककुतपानामन्यतमेऽभ्युक्षिते द्वितीयवस्त्राभावेतृतीयमुपवीतंवायोगपट्टं
वाकुशरज्जुंवासूत्रंवापरिधानीयस्योत्तरार्द्धंवोत्तरीयंकुर्यात् मृदौत्स्नकरौप्रक्षाल्याचम्य मृदोदकेनचोक्तपाणीचक्रमेण ५

अ

प्रक्षाल्याचम्य प्राङ्मुख उदङ्मुखो वोपविश्य कुशपवित्रोपग्रहपाणिर्ब्रह्मतीर्थेन त्रिरपश्चाचम्य सोदकेनांगुष्ठमूलेन मुखं द्विः
प्रमृज्य सर्वाङ्गुलिभिरोष्ठौ स्पृष्ट्वा । तर्जन्यङ्गुष्ठाभ्यां दक्षिणोत्तरे नासारन्ध्रे । अनामिकाङ्गुष्ठाभ्यां दक्षिणोत्तरे द्विणी । ताभ्या
मेव दक्षिणोत्तरे कर्णौ । कनिष्ठिकाङ्गुष्ठाभ्यां नाभिं । पाणितलेन हृदयं । कराग्रेण मूर्द्धानं दक्षिणोत्तरे भुजमूले वोपस्पृशेत्
एवं द्विराचम्य शिष्टाचारपरिप्राप्तं गङ्गातीर्थमृत्तिकयोर्ध्वपुण्ड्रं तिलकं ललाटे कुर्यात् त्रिरायम्याऽसून् त्रिस्त्रिवारान् स्वप्राणा
प्राणवायुमायम्य सन्निरुध्य । प्राणायमनप्रकारो गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम् प्रतिप्रणवसंयुक्तां त्रिरयं प्राण
संयम इति योगीश्वरेणोक्तो द्रष्टव्यः पुष्पाण्यपत्रमिश्राण्यर्घ्यं दत्वा पुष्पाण्युत्तमानि तदभावे बिल्वादिपत्राण्यम्बुना
जलेन मिश्राणि संयुक्तान्यञ्जलिना दद्यात् यामोर्द्ध्वमुपरिस्थपश्चिमुखं दिशोन्नत्यं जपप्रणवव्याहृतिपूर्विकया गायत्र्या ॐ
देवाऊस्तर्यमदीदन्नुद्वयमुरुंसंवित्रं नवद्वारिति गायत्र्यावयथाशक्ति उद्धुत्यं सूर्याभिमुखो बाहूपस्थसमर्द्धं देवाऊस्तन्त्वं पैमा

दित्यमुदीक्ष्य प्रपन्न् उद्वयमित्यादिनोक्ताभिस्ततस्तृभिऋग्भिर्गायत्र्या च यथाशक्ति अष्टोत्तरसहस्रादिसंख्यया ऽऽवर्त्ति-
ह. तया विश्वा डित्यनुवाके रुद्रसूक्तशिवसंकल्पमण्डलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेत् विश्वा षड्
८ डित्यनुवाकेन पुरुषसूक्तेन सहस्रशीर्षेत्यादिषोडशर्चेन शिवसंकल्पेन यज्जाग्रत इत्यादि[illegible]वेन मण्डलब्राह्मणेन य
6 देतन्मण्डलं तपतीत्यादिनोपस्थाय सूर्यं स्तुत्वा तमेव प्रदक्षिणीकृत्य नमस्कृत्य स्वकायवाङ्मनोभिः प्रणम्योपविशे
त् आसीनः पूर्वं त्रिरायम्यासून् इत्यारभ्योपविशेदित्यन्तेन सूत्रसंदर्भेण सन्ध्योपासनमुक्तवान्कात्यायनः तत्काण्व सा
या माध्यन्दिनीनां सहस्रशोक्तत्वात् शाखार्थानुष्ठानसिद्धिकरम् सत्सु न प्रशाखान्तराधिकरणन्यायेनेदमेव कल्पत
रुकारप्रभृतिभिर्निबन्धकारैराह्निकपद्धतिकारैश्च सूत्रपन्नरीकं संध्योपासनविधानं मञ्जितं लिखितं तत्सर्ववेद
शाखाध्येतृसाधारणत्वात्सर्वशाखिनामनुष्ठानं मुचितम् दर्भेषु दर्भपाणिस्त्वा ध्यायञ्च यथाशक्त्यादावारभ्य वेदं ॥ ८

दर्भाः पवित्रो पग्रहादिति
क्षापारायणं स्यात्

शान्ति-२

दर्भेषु प्रशस्तदारुनिर्मितासनोपरि निहितेषु प्रागग्रेषु वा त्रिषु कुशेष्वासीनः प्राङ्मुख उदङ्मुखो वा दर्भपाणिः पवि[illegible]ः
व्यतिरिक्तकुशहस्तः स्वाध्यायं ब्रह्मयज्ञं यथा शाखानुसारेण कुर्यात् किंकृत्वा आरभ्य उपक्रम्य कं वेदं मन्त्रब्राह्मणात्म
त्मकं कुतः आरभ्य आदावादितः इषे त्वोर्जे त्वेत्यादितः अत्र वेदमित्येकवचनोपदेशादनेकवेदाध्यायिनोऽप्येकं वेदमारभ्य प्र
तिदिनमुपर्युपर्यध्ययनेन समाप्यान्यं वेदमारभ्य तथैव समाप्याऽथ पुराणेतिहासादीनपि तथैवादितः आरभ्यैकैकं स
माप्यापरमारभ्य समापयेत् न तु पठद्व्ययाएकदेशमेकदेशम् आदावारभ्येति नियमात् वेदशब्दोऽप्युपलक्षणार्थः यदा
ह याज्ञवल्क्यः वेदशास्त्रपुराणानि सेतिहासानि शक्तितः जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् स चायं ब्रह्मय
ज्ञः कालान्तरेऽपि स्मर्यते यस्तु श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स तु स स्मृतः स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः
वैश्वदेवावसाने वा नान्यत्रेति निमित्तकादिति छन्दोगपरिशिष्टे २ इति द्वितीयकाण्डिकासूत्रार्थः एवं कृतब्रह्मयज्ञ

इति-२

स्ततः किं कुर्यादित्यत आह ततस्तर्पयेद्ब्रह्माणम् सर्वं विश्व ॐ रुद्रम्प्रजापतिं देवांश्छन्दांसि वेदानृषीन्पुराणाचार्यान्गन्ध
र्वानितराचार्यान्संवत्सरं च सावयवं देवीरप्सरसो देवानुगान्नागान्सागरान्पर्वतान्सरितो मनुष्यान्यक्षान्रक्षांसि पिशा
चान्सुपर्णान्भूतानि पशून्वनस्पतीनोषधीर्भूतग्रामश्चतुर्विधस्तृप्यन्तामित्योंकारपूर्वम् विश्वादिभूतग्रामान्तानां
देवानामादौ ब्रह्माणं तर्पयेत् अत्र तर्पयेद्ब्रह्माणमिति तर्पणक्रियायाः कर्मीभूतान्ब्रह्मादीनुद्दिश्य तेन द्वितीयया
भिधाय भूतग्रामश्चतुर्विधस्तृप्यन्तामिति प्रथमया प्रयोगमाचार्यो दर्शयति ततश्च ॐ ब्रह्मा तृप्यतामित्येवं तर्पणे प्र
योगो भवति एतावान्तरायिकरणप्रोक्तेनावाहनमपि द्रष्टव्यम् ततो निवीती मनुष्यान् ततो देवतर्पणान
न्तरं निवीती कण्ठलम्बितब्रह्मसूत्रस्तन्मनुष्यादिवान्मानवांस्तर्पयेदित्यनुषङ्गः के ते मनुष्या इत्यपेक्षितमि
त्यत आह सनकं च सनन्दनं च सनातनं च कपिलं चासुरिं च वोढुं पञ्चशिखम् सप्त ततोपसव्यं तिलमिश्रम् त

ल कौंलर्पयेदि

तोमनुष्यतर्पणानन्तरमपसव्यं प्राचीनावीने कृत्वा तिलमिश्रैस्तिलैस्संयुक्तं जलं गृहीत्वा तर्पयेदिति संबंधः किं यत्तदुप
पेक्षायामाह कव्यवाडनलॐ सोमेयममर्यमणमग्निष्वात्तान्सोमपोवर्हिषदः कव्यं पित्र्यं हविर्वहतीति कव्यवाट्
अनलोऽग्निः कव्यवाट्चासावनलश्चेति कव्यवाडनलस्तम् अत्र कव्यवाडनलइति केचिद्देवतेमन्यन्ते तदयुक्तम्
हव्यवाहनोवैदेवानांकव्यवाहनः पितृणामितिश्रुतेः कव्यवाड्गुणविशिष्टोऽग्निः पितृणामेतर्गतइतिकव्यवाडनलइ
त्येकैवदेवता यमांश्चैके एकेआचार्यायमांस्तर्पयेदित्याहुः तेच यमाय धर्मराजाय मृत्यवे चान्तकाय च वैवस्वता
यकालाय सर्वभूतक्षयाय च औदुंबराय दध्नाय नीलाय परमेष्ठिने वृकोदराय चित्राय [illegible] चित्रगु
प्तायवैनमइति श्लोकोक्ताः पितृतर्पणेंजलिसंख्यामाह एकैकस्य तिलैर्मिश्रांस्त्रीस्त्रीन्दद्याज्जलांजलीन् एके
कस्य प्रत्येकं कव्यवाडनलादेस्तिलैः कृष्णैर्मिश्रान्संयुक्तान्त्रीस्त्रीन् त्रिसंख्योपेतांजलांजलीन् जलेन पूर्णानञ्ज

न्

त्य

लयोजलाञ्जलयस्तान् अस्मात्तर्पणस्य नित्यस्यानुषंगिकं फलमाह यावज्जीवकृतं पापं तत्क्षणादेव नश्यति जन्मतश्चार
भ्य तर्पणदिनपर्यन्तं कृतमाचरितं यत्पापमशुभं कर्म तत्क्षणादेव तर्पणसमनन्तरमेव नश्यति क्षीयते जीवत्पितृ
ह्र ८ कोऽप्येतानन्यांश्चेतरः जीवन्विद्यमानः पिता जनको यस्य सोऽप्येतान्सर्वांल्लोकान्ब्रह्मादीन्चित्रगुप्तपर्यन्तांस्तर्पयेदिति पू
र्वेण संबंधः इतरो जीवत्पितृकादन्यः प्रमीतपितृकोऽस्मानप्येतेभ्योऽपरान्पितॄन् चकारात्सर्वांल्लोकान पितॄंस्तर्पयेत् तर्पण
८ वाक्यानां प्रयोगो वक्ष्यते तत्र पितृपितामहादींस्तर्पयन् प्रसेकाख्यं कर्म कुर्यादित्यत आह उदीरतामंगिरसश्चापन्तु न ऊर्जं
वहन्तीः पितृभ्यायेवह मधुवाता इति त्र्यृचं जपन् प्रसिञ्चेत् उदीरतामिति प्रतीकोक्ताः षडृचो मधुवाता इति त्र्यृचं चैवं न ववीं
[illegible] जपन् उपांशुम्नायस्वरेण पठन् प्रसिञ्चेत् अञ्जलिकृता अपः पितृतीर्थेन तर्पणजलाधि
करणे प्रसिञ्चेत् तृप्यध्वमिति त्रिः तथा तृप्यध्वमिति प्रत्येकमन्त्रान्त्रिः प्रसिंचेत् अत्र केचित् उदीरतामित्यादिकानाम्

दितर्पणमात्रं तं ४

वापित्रादितर्प्पणेऽञ्जलिदानेकरणत्वमम्मन्यन्ते तदसाम्प्रतम् सूत्रार्थपर्यालोचनयाकरणतायाअप्रतीतेः कथंजप
न्नसिंचेदितिशतृप्रत्ययेनमंत्रान्जपतामस्ततास्ततेजलप्रक्षेपः कार्यइतिहितात्पर्यंसूत्रात्प्रतीयते करणत्वेतुमन्त्रानैः क
र्म्मादिस्यान्निपातितादितिपरिभाषयामंत्रानैंजलिर्देयः तथाचसतिजपशातृप्रत्ययस्यवानर्थक्यप्रसंगः प्रसेकप्रा
हस्यदानार्थताकल्पनाच्च तस्मात्प्रसेकाख्यमिदंकर्मान्तरम् तदाहयोगीश्वरो याज्ञवल्क्योऽपि पितृन्ध्यायन्नसिंचेदैजप
न्मन्त्रान्यथाक्रममिति नमोवश्शुक्कामातामहानामप्येवंगुरुशिष्यर्त्विग्ज्ञातिबान्धवान् नमोवः पितरोरसायेत्यादीन्
ह्रौपञ्चेष्वुक्तापठित्वामातामहानाम्मातः पितृपितामहप्रपितामहानामप्येवमेकैकस्यतिलमिश्रेणांजलित्रयेणत
र्प्पणंकृत्वागुर्वादयोप्येकैकेनांजलिनातर्प्याः गुरुमाचार्यमुपनीयवेदाध्यापकान् ऋत्विजोयाजकान्ज्ञातीन्पि
तृव्यभ्रात्रादिसपिण्डसगोत्रजान् बांधवान्मातुलेयपैतृष्वस्रीयमातृष्वस्रीयादीन् अतर्पणेप्रत्यवायमाह अतर्पिताः

तर्पयेदित्यनुवर्तत एव

आचम्य = ३ श्री

रु. ४

देहाद्रुधिरमपिबन्ति एते सर्वे लोकाब्रह्मादयोऽतर्पितास्सन्तो देहादतर्पयितृशरीराद्रुधिरं पिबन्ति तर्पणाकरणजप्रत्यवायेन देहा
द्रक्तशोषणं भवतीत्यर्थः एतदनिष्टापत्तिवचनं तर्पणस्यावश्यकत्वज्ञापनार्थम् देवताप्रजनमाह वासो निष्पीड्याचम्य ब्राह्मवै
ष्णवरौद्रसावित्रमैत्रवारुणैस्तल्लिंगैरर्चयेत् स्नानवस्त्राञ्जलिं निष्पीड्य आचम्य ब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणैर्ब्राह्म
वैष्णवरौद्रसावित्रमैत्रवारुणैस्तैः कीदृशैः तल्लिंगैः तेषां ब्रह्मादीनां लिंगप्रकाशनसामर्थ्यं येषु ते तल्लिंगास्तैस्तल्लिंगैः
ननु ब्राह्मेत्यादिना देवतानिर्देशेनैव तल्लिंगत्वे प्राप्ते तल्लिंगैरिति किमर्थम् उच्यते श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्या
भिर्मन्त्राणामंगविनियोगो भवति सर्वत्र अत्र तु लिंगमेव विनियोजकम् तेन येषां तत्प्रकाशने सामर्थ्यं ते ग्राह्या इत्येवमर्थम्
तल्लिंगैरर्चयेत् तत्र ब्रह्मविष्णुमहेश्वराणां केनचित् तल्लिंगमन्त्रेणार्चनीया इत्यर्थः सवितृमित्रवरुणानां प्रोपादेयगतबहुत्व
संख्याविशेषानपेक्षत्वाद्विवक्षितत्वाद्बहुत्वस्य विवक्षितत्वात्त्रिभिरेवार्चनीयाः ब्रह्मविष्णुरुद्रसवितृमित्रवरुणान्पृथक् ४

ष्टपकृजयेत् अत्रआवाहनादिकम् विसोक्त्वावाहनाद्युपचारैश्शात्वान्तराधिकरणमायेनावाहनादिकंप्रणयेरन्। एतज
नेनपुरुषसूक्तेनमाविश्याधूपदीपादिदेयम् अष्टस्न० ह० स्वस्त्युपस्थायप्रदक्षिणीकृत्यदिशश्चदेवताश्चनमस्कृत्यो
पविश्यब्रह्माग्निपृथिव्योषधिवाग्वाचस्पतिविष्णुमहद्भ्योऽद्भ्योऽपांपतयेवरुणायनमइतिसर्वत्रसंवर्चसेतिमुखंविमृ
ष्टेदेवागातुविदइतिविसर्जयेत्॥ अष्टस्नमस्पह० स्वस्त्येताभ्यामृग्भ्यांमादित्यंभगवंतमुपस्थायप्रदक्षिणमाहृ दिशं त्य
प्राच्याद्यादेवताश्चसन्निधानान्तासामधिपतीनिन्द्रादीन्नमस्कृत्यमंत्रेणमनभिध्यानान्नाममन्त्रैर्नमोऽभियोगाच्चत
र्थ्यन्तैः प्रणम्यनत्वोपविश्यासितावब्रह्मादिवरुणान्तेभ्योदेवे[illegible]भ्योनमस्कृत्ययोगियाज्ञवल्क्यवचनाद
दकदानसहितंसंवर्चसेतिमंत्रेणाञ्जलिनाजलमादायमुखमास्यंविमृष्टेप्रोक्षयेत् देवागातुविदितिमंत्रेणस्नानक
र्मागमस्तादेवताविसर्जयेत्स्वस्थानेगमयेत् पक्षस्नानविधिः२४ इति अत्राचार्योमाध्याह्निकक्रियांगस्नानेतिकर्त

पक्षस्नानविधिः =१

ख्यानामभिधायेदानीमेष स्नानविधिरित्यनेन स्नानांतरेऽपि मलापकर्षणाशुचिस्पर्शनादिनैमित्तिकस्नानव्यतिरिक्ते एष एव
ह॰ वविधिरितिकर्तव्यतेत्यतिदिशति स्रवन्त्यादिजलाशय एव यथाह छन्दोगपरिशिष्टे कात्यायनः यथाहनि तथा प्रातर्नि
९ त्यं स्नायादनातुरः दन्तान्प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवदिति जलाशयादन्यत्र स्नाने मन्त्रनिवृत्तिमाह तिपादयस्ततो यदि गेहे
उत्सृष्टतोदकेन शीतेनोष्णेन वा स्नाति तदानकश्चिद्विधिः अमन्त्रवदिति वचनात् मंत्रोच्चारणं नास्तीति मंत्रवन्मंत्रसहितं न मंत्र
10 यद्वा वदमंत्रवत् अमंत्रो मंत्राभाववान् शूद्रस्य यथा तद्वत्स्नाति तद्वत्स्नायादित्यर्थः तद्यथा शुचौ देशे उपविष्टः पादौ करौ
च मृज्जलैः प्रक्षाल्य कुशपवित्रोपग्रहः आचम्यादित्याभिमुखः स्नानाद्यादि प्रशस्तपात्रस्थं प्रशस्तं जलं गंगादितीर्थजल
बुद्ध्यादाय शिरःप्रभृति वहिःसर्वांगेन स्नायात् अवश्यकसंध्योपासनाग्निहोत्रादिकर्मानुष्ठानाधिकारार्थं यतः स्मर
न्ति स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि पवित्राणां तथा जप्ये दाने च विधिचोदिते इति इदं चाहरहः स्नाने मुख्ये १०

अस्यासंभवे प्रशस्तभस्मना सर्वांगोद्धूलनमाग्नेयम् गवांखुरोद्धूतरजसा शरीरे ग्रहणं वायव्यम् आपो
हिष्ठादिभिस्तिसृभिर्द्रुपदादिव शन्नोदेवीरिदमापः प्रवहतेति वतल्लिंगैर्मंत्रैः प्रतिमंत्रं कुशाग्रेण मूर्ध्नि जलाभिषे
कोमंत्रम् आर्द्रेणवाससा सर्वशरीरमार्जनमेव कापिलम् आपोहिष्ठेति ऋचं वा ब्राह्मम् मृदालेभः पार्थिवम् अद्भि
रातपवर्षादिजाभिर्दिव्यम्। सच्चिदानंदात्मानात्मकजगत्कारणविश्वव्यापकवासुदेवसंस्मरणं मानसम् दक्षि
णावर्तशंखेन ताम्रपात्रगतोदकस्य शिरसा प्रतिग्रहेऽपरार्कोर्कविल्वप्रतिमाशालिग्रामशिलास्नानोदकेन च
शिरसोभिषेचनेवादशगुणफलप्रदमिति एतेषां स्नानानामनुकल्पानामन्यतमेन नित्यकर्मानुष्ठानाधिकारसंपन्नये
शुचौदेशउपविश्य मृदंभोभिः पाणीपादौ च प्रक्षाल्य कुशोपग्रह पवित्रपाणिराचम्य सूर्याभिमुखः स्नायात्।
एते स्नानानुकल्पाः सर्ववर्णानां सर्वेषां स्वाध्यायिनां च मंत्रस्नानं विहाय साधारणमाह प्रातःस्नानन्निमम्

विधिविशेषः कर्मणामस्य पुराणादिविहितैर्नत्वा नावधिना विशेषो बोध्यः एवमन्य
यथोक्तविधिस्नान ४

चण्डालशवपूयरजस्वलास्पृष्ट्वा स्नानार्हः स्नातितत्वैमितिकं स्नानम् देवस्तविधिवोदितं पुण्यस्नानादि काम्यम्

ॐ ह जपयज्ञदेवपितृपूजनार्थं नद्यादितीर्थेषु यत्स्नानं तत्क्रियांगं अभ्यंगपूर्वकं तन्मलापकर्षणम् देवखातादिती

११ र्थेषु वक्रियास्नानमिति कात्यायनोक्तस्नानविधिस्तु काण्वमाध्यंदिनानां नियतः इतरेषां वानुक्तविधिवाज

सनेयिनां बह्वृचानां तत्तदुक्तस्नानविधिः स्नानमालस्यादिना ऽकुर्वतो न कर्माधिकारः नवफलवत्क्रियाया स्ना

नादेः फलावाप्तिः प्रस्तुतविहिताकरणात्प्रत्यवायसंभवो गृहस्थस्यैव नित्यं विधीयते यतेस्तु त्रिः ब्रह्मविधौ गृह

वः ब्रह्मचारिणो याज्ञवल्क्येनोक्तः यथास्नानमहन्यहनि चैत्रैरिति अत्रैष स्नानविधिरिति वचनाद्यथाह

नि तथा प्रातरिति वचनाच्च प्रातःस्नाने ऽप्यस्य विधेः प्राप्तौ छंदोगपरिशिष्टे विशेषो विज्ञेयः अल्पत्वाद्धो

मकालस्य बहुत्वात्स्नानकर्मणः प्रातर्न तनुयात्स्नानं होमलोपो विगर्हित इति ततस्तु स्नात्वाग्निं पादप्रक्षा ११

मि हो=३ रो=३

त्नादिगोमयविलेपनान्तं विधाय मज्जनकमेतमभिषिच्य निमज्ज्याघमर्षदर्भैः प्रणवव्याहृति गायत्रीभिः प्रति
मन्त्रमाप्लावयित्वा मज्जनकमेति पुनरभिषिच्यान्तर्जले ऽघमर्षणादीनामन्यतममावर्त्याचम्य निर्गच्छेत् निः
त्रिस्तु हन्त्रमनुतिष्ठेत् अनुदिते ति संकोचनिमित्तस्यैतस्याभावात् जटिनाशिरोगिणामर्धकण्ठान्मज्जनं स्नानं सम घ्या
र्द्धकर्येषितास्व ग्रहणादिनिमित्तके गंगादितीर्थे संक्रान्त्यादिपर्वनिमित्तकं फलप्रदं ज्ञ दीनामपि सशि
रस्कमेव स्त्रीशूद्राणां सर्वत्र तत्स्नीम् यथाह योगियाज्ञवल्क्यः ब्राह्मणक्षत्रियविशां स्नानं स्मन्त्रवदिष्यते तू
हरिणा नैव ना ष्णीमेव तु शूद्रस्य सनमस्कारकं स्मृतं बौधायनश्च अंभोऽवगाहनं स्नानं विहितं सार्ववर्णिकम् मन्त्रवत्प्रोक्षणं
शास्तव चापि द्विजातीनां विशिष्यत इति नमस्कारश्च नमो नारायणायेति इति स्नानविवरणम् अथ पद्धतिः अत्राप्यथा
विभक्तस्याहृश्च तथैभा गोमृदादीनि स्नानोपकरणान्याहृत्य नद्याद्युदकाशयं गत्वा तत्र तीरस्य दाल्पमृद्गोमयकुश

तिलस्त्वमन्नसोनिधायमृद्भिरद्भिश्चपादौहस्तावपिप्रक्षाल्यदक्षिणदेशेसाग्रंप्रादेशमात्रमनन्तर्गर्भंरहितंद्विदलंकौ॰
ह॰ शम्पवित्रंकृत्वावामकरेत्रिप्रभृतिबहून्कुशानुपग्रहंकृत्वाबद्धशिखोयज्ञोपवीत्येकवासाऽऽचमनंकृत्वा ॐ ह्रींस
१२ दिकंडिकयाविधिं तियाशुनःशेपऋषियावरुणदेवतयात्रिष्टुभाज्योतिष्टोमायवभृथेयजमानवाचनेविनियुक्त
यातीर्थ्यंतोयमामन्त्र्यपेतेशतमित्यादिकण्डिकयास्वाहान्तयाशुनःशेपऋषियावारुण्यात्रिष्टुभानत्रोयमावर्तयेत्
स्वमितिविधानइतियजुषाप्रजापत्यर्षि सरस्वतीदृष्टेनादेवतेनतोयम ञ्जलिनागृहीतं ॐ मित्रियाऽऽपः इतिप्रजापत्य
र्षि सरस्वतीदृष्टेनादेवतेनांजलिस्थंजलंद्वेष्यमनस्तात्स्त्राद्वेष्याभावेकामादीन्द्वेष्यभावेकामादीन्द्वेष्याभावे
नत्यत्रानिषिंचेत् ततोमृदंत्रेयाविभज्यैकस्माद्भागाद्ल्यांमृदंवामकरेणादायकटिमनुलिप्याद्भिः प्रक्षाल्यतथैव
पुनर्द्विवारंप्रक्षाल्यैवैवमेववल्लिमृगुजंघेवरणौकर्णौवैकैकप्राः प्रक्षाल्या स्योदकायनमइतितीर्थोदकन्त्वत्वेदंवि १२

सुरित्यृचामेधातिथिरृषिर्गायत्र्यावेसव्याद्दक्षिणपाणिगृहीतयामृदामुखतोनाभिपर्यन्तंवामकरेण॰
गृहीतयानाभितः पादपर्यन्तमङ्गान्यालिप्यप्रणवेनोभिपर्यन्तञ्जलमप्रविश्यसूर्याभिमुखःस्थित्वाऽऽपोऽ
स्मानितिमन्त्रेणप्रजापतिनाऽऽर्षेणानुष्टुप्छन्दस्केनाहूँवत्येनदीक्षायांयजमानस्नानेविनियुक्तेनजलेमः
ज्जेत् उदिदाभ्यइतिमन्त्रेणोन्मज्यपुनस्त्वसीतिमज्योन्मज्यावम्यपाणिभ्यांगोमयमादायमानस्तोकइत्य
चाकुत्सऋषिर्यारौद्रीजगत्याशतरुद्रियेजप्तिलहोमविनियुक्तयादक्षिणपाणिस्थेनगोमयेनमुखादितोनाभि
पर्यन्तंवामकरस्थेननाभितोऽध्रिपर्यन्तंशरीरंविलिंपेत्। ततइमम्मेवरुणे वाशुनःशेफऋषिर्गायत्र्यावारु
णपावलकेनमूर्द्धानमभिषिच्यतत्त्वायामीतिशुनःशेफऋषिर्यात्रिष्टुभावारुण्यापानयातत्रस्ततत्रस्थे
नाभ्या ष्टुभ्यांवामदेवीभ्यामृत्तृचंमापोमौषधीर्हिंसीरितिशतावतायजुषा प्रजापतिरृषिर्हृदयमूलंदेव

ह. २

तेनोऽन्नममितिश्नप्रेशफट्टयात्रिष्टुभावाहरणपामंत्रं त्तुमेतितिभिबगाथर्वणार्षयाःनुष्टुभौषधिदेवतयाः
वभृथनिवमुणप्रजापतिटष्टयाजगत्यातोयदेवतयाः भिषिंचेत् ततस्त्रस्त्रीनिमञ्ज्यावम्यत्रिभिर्दर्भैर्दक्षिण
करष्टैतेस्मोदकैर्नाभिमारभ्यप्रदक्षिणन्नाभिपर्यंतंवक्षसमार्गैः प्रणवादिभिर्मन्त्रैरात्मानंपावयेत् तत्रप्रण
वस्यब्रह्माऋषिः परमात्मादेवतादेवीगायत्रीछंदोब्रह्मारंभविरामसर्वकर्मादिषुविनियोगः व्याहृतीना
म्प्रजापतिऋषिरग्निर्वायुस्सूर्योदेवतागायत्र्युष्णिगनुष्टुप्छन्दांसिअग्न्याधानेविनियोगः गायत्र्याविश्वा
मित्रऋषिस्सवितादेवतागायत्रीछंदोगार्हपत्यस्थानेविनियोगः आपोहिष्ठेतितिसृणांसिन्धुद्वीपऋषि
रापोदेवतागायत्रीछन्दः ... समरणेपर्णकषायनिष्पक्वोदकामेविनियोगः इदमापइतिप्रजापतिऋ
षिरापोदेवतागायत्र्यवसानामहापंक्तिछन्दोंत्यःपादः पावमानोदेवत्यः यश्चोवावालेमार्जनेविनियोगः

हविष्मतीरिमाऽऽपइति प्रजापतिरृषिर्यजमानाधरस्तूर्य्यो देवताऽनुष्टुप्छन्दो वसतीवरीणामपांग्रहणे विनियो
गः देवीरापो अपान्नपादिति प्रजापतिरृषिरापो देवता पंक्तिश्छन्द अप्स्वाज्यहोमे विनियोगः कार्षिरसीति
प्रजापतिरृषिराज्यं देवतानुष्टुप्छन्द आज्यप्रप्लावने विनियोगः आपो देवा इति वरुण ऋषिरापो देवताऽनुष्टु
प्छन्दो राजसूयेऽभिषेचनीयेऽपां संभरणे विनियोगः द्रुपदादिवेति प्रजापत्याश्विसरस्वतीन्द्रा ऋषय आपो दे
वता अनुष्टुप्छन्दो वासोपप्लावने विनियोगः शन्नो देवीरिति सिन्धुद्वीप ऋषिरापो देवता गायत्री छन्दश्शा
न्तिकरणे विनियोगः अपां रसमिति बृहस्पतिरृषिः सोमो देवताऽनुष्टुप्छन्दस्तर्थवाजपेयग्रहणे
विनियोगः आपो देवीरिति सिन्धुद्वीप ऋषिरापो देवता न्यङ्कुसारिणी बृहती छन्द उत्खाते तोत्स्वातनि
र्माणार्थमक्रमावसेके विनियोगः (आपो देवीरिति सिन्धुद्वीप ऋषिरापो देवतान्यं। पुनन्तु मेति द्वयोः अ

जापत्याश्विसरस्वतीन्द्रा ऋषयः पितरो देवताः नुष्टुप् छन्दः सौत्रामण्यां सुराग्रहशोधप्रतिपत्तिसमनन्तरपवित्रहिरण्यपसु
ह्र राभिर्यजमानानां भाल पावने विनियोगः अग्न आयूंषीति वैश्वानरर्षिरग्निर्देवता गायत्री छन्दः पुनन्तु मे
७ ति प्रजापतिऋषिर्देवयजन विश्वाभूतानि जातवेदाश्च देवता गायत्री छन्दः पवित्रेणेत्यादीनाम्पञ्चानां प्रजापत्याश्वि
14 सरस्वतीन्द्रा ऋषयः प्रथमाया अग्निर्देवता गायत्री छन्दो द्वितीयाया अग्निर्ब्रह्म देवता गायत्री छन्दस्तृतीयायास्सो
मो देवता गायत्री छंदश्चतुर्थ्यास्सविता देवता गायत्री छन्दः पञ्चम्या[illegible] विश्वेदेवा देवता त्रिष्टुप् छन्दः पूर्वोक्तपाव-
ने विनियोगः चित्पतिर्मा वाक्पतिर्मा देवो मेति त्रयाणां यजुषां प्रजापतिऋषिर्द्वयोः प्रजापतिर्देवता तृतीयस्य
सविता देवता दीक्षणीयायां यजमानपावने विनियोगः ॐकारादीनां पूर्ववत् अत्र पावने एवं प्रयोगः ॐकारी
स्या ऋषयादीन्स्मरनौं पुनातु ॐ भूः पुनातु ॐ भुवः पुनातु ॐ स्वः पुनातु गायत्र्या अन्ते सर्वम्पुनातु ७
ओ

मि=

ततआपोहिष्ठेतिप्रभृतिभिर्वै अनुष्टुप्छन्दोयाआपोमपप्लावनेविनियोगः पुनातुदेवोवितासवितानुष्टुपर्वितापौदेव
ताह्नदेवीशुनतीयन्ताभिर्ऋग्भिःप्रत्यृचमप्यावपित्वावाक्कातिमीपुनातवच्छिद्रेणपवित्रेणसूर्यस्येत्यारभ्यतच्छकेय
मित्यन्तेनदेवोमासविनापुनातवच्छिद्रेणसूर्यस्येत्यन्तेनपावयेत् ततओंपुनातितितिपूर्ववत्प्यावापित्वापावन
ऊष्णन्यपित्यजप्पूर्ववदिममेवरुणेत्यादिर्ऋवभृथेत्यन्ताभिरष्टाभिर्ऋग्भिरभिषिच्यान्तर्जलेनिमज्ज्यऋत
ञ्चसत्यञ्चेतिसूक्तमघमर्षणऋषिर्भाववृत्तदैवतमानुष्टुभमस्यमेयावभृथेविनियुक्तं त्रिर्जपेत् अथवाद्रु
पदादिवेतिकोकिलराजपुत्रऋषिमार्षीमनुष्टुभंसौत्रामण्यवभृथेवासोपप्लावनेविनियुक्ताम् यद्वा
आपोगौरित्यृष्वंसर्पराजऋषिमाग्नेयींगायत्रीमप्राणायामंवाशिरस्सहितमोमितिवात्रिर्जपेत् परमा
त्मानमथयंविस्मृतस्मरेत् ततस्तद्विस्तुरित्यनयामेयातिथिऋषिपावैलक्ष्यागायत्र्याचक्षालोदीक्षणेविनि

७

ह॰ १५

15

मुक्तयात्रिस्नात्वावस्थानिर्गच्छेत् इतिस्नानप्रयोगपद्धतिः निर्गत्यपादौजलेस्थलेकृत्वाद्विराचम्यधौतेवस्त्रेपरिधा
यमृद्भिश्चोरूकरौप्रक्षाल्यश्रीपर्णादिप्रशस्तदारुनिर्मितेऊशात्रयान्वितेसुप्रक्षालितेआसनेप्रागास्योदगास्योवा
सीनउक्तलक्षणेपवित्रहस्तःसुवर्णरूप्यालंकृतपाणियुगलउक्तेनविधिनाद्विराचम्यभगवंतंभास्करंपरमात्मस्वरू
पन्नारायणंस्मरन्सन्ध्योपासनमारभेत् तद्यथा ॐकारस्यब्रह्माऋषिः परमात्मादेवतागायत्रीछन्दस्स
र्वकर्मारंभेविनियोगः भूरादिसप्तव्याहृतीनांप्रजापतिऋषिरग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवादे
वतागायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छन्दांसितत्सवितुरितिविश्वामित्रऋषिस्सवितादेवतागा
यत्रीछन्दआपोज्योतिरितिप्रजापतिऋषिर्ब्रह्माग्निवायुसूर्यादेवताद्विपदागायत्रीछन्दस्सर्वेषांव्याहृत्यादी
नाम्मन्त्राणाम्प्राणायामेविनियोगःउक्त्वाप्राणवायुन्निरुद्ध्य ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐत १५

त्स=३

पः ॐ सत्यम् ॐ तत्सेत्यादिवोदयादित्यंतं ॐ आपोज्योतिरसोमृतम् ब्रह्मभूर्भुवस्स्वरोम् एवन्त्वयाहस्तोपा
त्तदुरितक्षयार्थमध्याह्नसंध्यामहमुपास्य इतिप्रतिज्ञाय आयाहिवरदेदेवित्र्यक्षरेब्रह्मवादिनि गायत्रिच्छ
न्दसांमातर्ब्रह्मयोनेनमोस्तुते इतिमन्त्रेणसन्ध्यामावाह्य आपःपुनन्त्विति मारीचकश्यपोऋषिरापोदे
वताऽनुष्टुप्छन्दआचमनेविनियोगइत्यभिधायापः पुनन्त्वित्यादिप्रतिग्रहं स्वाहेत्यंतेनमन्त्रेणसकृदप
आचम्यस्मार्तमाचमनंकृत्वाकुशानादाय आपोहिष्ठेतित्र्यृचस्यसिंधुद्वीपऋषिरापोदेवतागायत्रीछन्दःप
ञ्चकषायपञ्चोदकावसेकेविनियोगइतिस्नात्वासकुशाग्रैरद्भिरापोहिष्ठामयोभुवइत्यादित्र्यृचस्यनवभिः ञ
पादैःप्रतिपादंशिरस्यभिषिंचेत् ततोद्रुपदादिवेतिकोकिलराजपुत्रऋषिरापोदेवताअनुष्टुप्छन्दसौ
त्रामण्यवभृथेवास्नापस्नावनेविनियोगइत्यभिधायचुलकेजलमादायतस्मिन्नासाग्रंनिधायद्रुपदादिवे

रा

मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुधंतु मैनस इति जपित्वा तज्जलं भूमौ उत्सृज्य ऋ

ह॰ तञ्च सत्यञ्चेति ऋृ वस्याघमर्षण ऋषिर्भाववृत्तो देवता अनुष्टुप्छन्द अश्वमेधावभृथे विनियोग इत्यञ्जुल·

२८ केन जलेनासाग्रे निधाय ॐ ऋतं च सत्यं चेत्यादि वान्तरिक्षमथो स्व इत्यन्तं जपित्वा तज्जलं भूमावुत्सृज्य पु

16 ष्पाणि वाम्बुमिश्राण्यंजलिनादायोत्थाय सप्रणवगायत्रीम्पठित्वाऽऽदित्यमुखोन्मूर्ध्वदृष्टोर्ध्ववाहुस्सू

स्वरव र्याभिमुखो वा उत्क्षिप्य उद्वयमिति प्रस्कण्व ऋषिस्सूर्यो देवता गायत्री छन्दो दाक्षिणहोमे विनियोगः वि

त्रमिति कुत्स आंगिरस ऋषिस्सूर्यो देवता त्रिष्टुप् छन्दो दाक्षिणहोमे विनियोगः तच्चक्षुरिति दध्यङ्ङाथर्व

ण ऋषिस्सूर्यो देवता पुरोष्णिक् छन्दो यजुर्मध्याय जुवन्त्या महावीरप्रशान्तिकरणे विनियोग इत्यभिधाय उद्व

यं चित्रं तच्चक्षुरिति पठन्नाभिर्ऋग्भिस्सूर्यमुपस्थाय तेजोसीति यजुं परमेष्ठी प्रजापतिऋषिराज्यं देवता आ· ८

ज्यावेदत्तएगायाआवाहनेविनियोगइत्युक्ता तेजोसिशुक्रमस्यमृतमसीत्येनावतायजुषागायत्रीमावाह्यप

रोरजसइतिविमलऋषिर्यजुःपरमात्मादेवतागायत्र्युपस्थानेविनियोगइत्युक्ता गायत्र्यस्येकपदीद्विपदीत्रिप

दीचतुष्पद्यपदसिनहिपद्यसेनमस्तेतुरीयायदर्शितायपदायपरोरजसेसावदोमाप्रापत्तदितिगायत्र्युपस्थाय

प्रणवस्यब्रह्माऋषिः परमात्मादेवतागायत्रीछन्दोव्याहृतीनांप्रजापतिऋषिरग्निवायुसूर्यादेवतागायत्र्युष्णि

गनुष्टुप्छन्दांसिगायत्र्याविश्वामित्रऋषिःसवितादेवतागायत्रीछन्दःअग्निर्मुखंब्रह्माहृदयंविष्णुःरुशरीरंसांख्यायन कृ

गोत्रंसर्वपापक्षयार्थेविनियोगइत्युक्ता ऽ ॐमोदतमाएोमन्त्रार्थमनुस्मरन्नविदितवित्तःस्फटिकपद्माक्षरुद्राक्षपु

त्रजीवकुशग्रन्थिहस्तपर्वाणीतिपूर्वपूर्वाभावेउत्तरजपमालयाप्रणवव्याहृतिपूर्वांगायत्रींसहस्रंशतंवादशवा

तोवायथाशक्तितोजपित्वाविश्वाडित्यादीनांवत्तदर्शनोविभ्राडुप्रमुकएवागस्त्यप्रोक्तकल्पस्कन्दवकुमारजमदग्नि

ह

नृमेयज्ञं त्वसहिरण्यस्तूपश्चांगिरसा ऋषयस्तृष्टैर्यो देवता प्रथमा जगती आद्यास्त्रिष्टोगाय ऋग्वानस्त्रिष्टुप्‌ यद्वेति नि चृ

ह. द्वा द्वा यत्रीनरणिश्चनन त्सूर्यं स्पहे त्रिष्टुभौ वरुणमहाप्द्वेह हनी सतो हृहत्यौ आपन्त इति हृहनी आक्रसेनेति वि

२८ ष्टुप्‌ तेषुवन्तनेति प्रतीकोक्तानां द्वयो प्रजापतिऋषिस्तृतीयायाः कुत्सः प्रथमा जगती द्वितीयतृतीययोस्त्रिष्टु

17 भौ सर्वे मेधे सूर्यस्तुति उक्थे तृतीयं विग्रहणे विनियोगः सहस्रशीर्षेति षोडशानाम्पुरुषऋषिः पुरुषो दे

वता पंचदशानामनुष्टुप्‌ षोडश्यास्त्रिष्टुप्छन्दः पुरुषमेधपशुतेन नियुक्तानाम्पुरुषाणां ब्रह्मणा ऋत्विजा

भिष्टवे विनियोगः यज्जाग्रत इति षण्णां शिवसंकल्प ऋषिर्मनो देवता त्रिष्टुप्छन्दः अनारम्याधीतत्वात्कामा

य नवं वचनाद्वादित्योपस्थाने जपे विनियोगः मण्डलब्राह्मणस्य ब्राह्मणत्वाच्छन्दस्त्वस्यादित्यस्योपस्थाने वि

नियोग इत्यभियायविश्वाडित्यनुवाकपुरुषसूक्तशिवसंकल्पमण्डलब्राह्मणोगरूपांशु पठितात्सूर्यमुपस्था ८

द

न्   वि

यप्रदक्षिणीकृत्य नमस्कृत्योपविशेदिति सूत्रार्थं तत्र समुच्चये कात्यायनसूत्रं हि तेन मध्याह्नसंध्योपासनम् केवलकात्याय
नसूत्रविहितं तु प्राणायामांजलिप्रदानादित्योपस्थानेत्रिकण्डिकासूत्रमंत्रानुसारिणी शास्त्रार्थानुष्ठानमात्र
करणम् बहूल्पे वा सत् श्लोकं यस्य यावेद्विचोदितम् तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेदिति स्मृतेः अथ ब्रह्म
यज्ञं कुर्यात् आसनोपविन्यस्तेषु प्रागग्रेषु दर्भेषु प्राङ्मुख उपविष्टः पाणिभ्यां दर्भानादायेषत्तादिकस्य ब्रह्मा
न्तस्य माध्यंदिनीयकस्य वाजसनेयकस्य विवस्वान् ऋषिर्वायुर्देवता गायत्र्यादीनि सर्वाणि छन्दांसि ब्रह्मयज्ञे विनि
योग इत्यभिधाय प्रणवव्याहृतिगायत्रीमाम्नायस्वरेणाधीत्याग्ने त्वेत्यादितो वेदमारभ्यानुवाकशो ऽध्यायशो यजुषो
वा सहितां ब्राह्मणं वाऽध्यायशो वा प्रणवावसाने यथाशक्ति प्रत्यहमधीयानो मंत्रं ब्राह्मणं च समाप्य पुनरेवमे
वारभ्य समापयेत् प्रणवव्याहृतिगायत्रीपूर्वकं तु प्रतिदिनं पठेत् एवं हि वेदाध्यायी त्रिवेदी चतुर्वेदी वैकैकं

यज्ञसे

वेदमारभ्याऽधीत्य समाप्यान्यमारभ्य समापयेत् एवमितिहासपुराणादीन्यपि ब्रह्मयज्ञसिद्धये जपेत् अत्रा
ह॰ प्याध्यात्मिकीं जपेदिति योगीश्वरेण पृथगभिधानादत्रानध्यायो नास्ति नास्ति नित्येष्वनध्याय इति स्मरणात्
१८ नित्यत्वाद्ब्रह्मयज्ञस्य इति ब्रह्मयज्ञविधिः एवं ब्रह्मयज्ञं विधाय तान्दर्भाननुसरन्तो निरस्यावसव्ययज्ञोपवीती प्राङ्मुख
18 स्त्रीन्दर्भानग्राग्रान्दक्षिणेन पाणिनादाय विश्वेदेवास आगत इति प्रजापतिदृष्टया गायत्र्या वैश्वदेवे ग्रहणे विनियु
क्तया देवानावाह्य विश्वेदेवाः शृणुतेममि न्तृतं आस्वयम्भूदृष्टां वैश्वदेवीं त्रिष्टुभं सर्वमेधे वैश्वदेवग्रहणे विनियु
क्तां जपित्वा सव्यकरान्वारब्धसकुशदक्षिणकरेण तोयं गृहीत्वा ॐ ब्रह्मा तृप्यतामित्यभिधाय जलमध्ये कर
स्याग्रयः प्रक्षिपेदेवं विष्णुस्तृप्यतां रुद्रस्तृप्यतां प्रजापतिस्तृप्यतां देवास्तृप्यन्तां छन्दांसि तृप्यन्तां वेदास्तृ
प्यन्तां ऋषयस्तृप्यन्तां पुराणाचार्यास्तृप्यन्तां गन्धर्वास्तृप्यन्तां इतराचार्यास्तृप्यन्तां [illegible] १८

सागरास्तृप्यंतां पर्वतास्तृप्यंतां सरितस्तृप्यताम् मनुष्यास्तृप्यंतां ‒२

रास्तृप्यन्तां पर्वतास्तृप्यन्तां संवत्सरस्सावयवस्तृप्यंतां देव्यस्तृप्यन्ताम् अप्सरसस्तृप्यन्तां देवानुगास्तृप्यंतां नागास्तृप्यंतां
सरितस्तृप्यंतां यक्षास्तृप्यंतां रक्षांसि तृप्यन्तां पिशाचास्तृप्यंतां सुपर्णास्तृप्यंतां भूतानि तृप्यन्ताः
म्पशवस्तृप्यन्तां वनस्पतयस्तृप्यन्तां ओषधयस्तृप्यंतां भूतग्रामश्चतुर्विधस्तृप्यतामिति प्रत्येकमेकै
केनाञ्जलिना तर्पयित्वोत्तराभिमुखो निवीती ऋञ्जलौ तिरश्चः कुशान्कृत्वा जलिनाऽपो गृहीत्वा सनकः
स्तृप्यतां सनन्दनस्तृप्यतां सनातनस्तृप्यतां कपिलस्तृप्यताम् आसुरिस्तृप्यतां वोढुस्तृप्यतां पंचशि
पंचशिखस्तृप्यतामित्येकैकस्मै दत्वा दक्षिणाभिमुखो प्राचीनावीती सव्यं जान्वाच्य तानेव दर्भान्मध्ये भ
ग्नान्सव्यांगुष्ठेन तिलानादाय दक्षिणे पाणौ गृहीत्वा द्विगुणीकृत्य सव्ये करे कृत्वा पितृतीर्थेनाञ्जलिं ज
लिमध्यपूर्यं ॐ कव्यवाडनलस्तृप्यतामिदमित्यभिधाय त्रीन् जलीन्दक्षिणे दिशा ॐ सोमस्तृप्यतां य

च्छिने दध्नोदराय चित्राय चित्रगुप्ताय नम इति प्रति दैवतं त्रीन् त्रीन् जलाञ्जलीन् दद्यात् एवमपरं =२

मस्तृप्यन्तामर्यमा तृप्यन्तामग्निष्वात्ताः पितरस्तृप्यन्तां सोमपास्तृप्यन्तां बर्हिषदः पितरस्तृप्यन्ताम् ओं यमाय न

हं: मः धर्मराजाय मृत्यवे अन्तकाय वैवस्वताय कालाय सर्वभूतक्षयाय औदुम्बराय दध्नाय नीलाय परमेष्ठिने जलित्रयमि

२९ त्रेदद्यात् ततो ऽमुकगोत्रो ऽस्मत्पिता ऽमुकशर्मा तृप्यतामिदं जलं सतिलं तस्मै तेस्वधा नम एवमपरमंजलि

द्वयमपि त्रेदद्यात् ततो ऽमुकगोत्रास्मत्पितामहो ऽमुकशर्मा तृप्यतामिदं जलं तस्मै ते स्वधा नम एवमपरमं

जलिद्वयं पितामहाय दत्ता ऽमुकगोत्रोस्मत्प्रपितामहोमुकशर्मा तृप्यतामिदं जलं तस्मै ते स्वधा नम एवमप

रमंजलिद्वयं प्रपितामहाय दत्ता ऽमुकगोत्रो ऽस्मन्मातामहो ऽमुकशर्मा तृप्यतामिदं जलं तस्मै ते स्वधा नम एव

मपरमंजलिद्वयं मातामहाय प्रमातामहाय वृद्धप्रमातामहाय तथैव त्रीन् त्रीन् जलीन् दत्वा ऽमुकगोत्रास्मन्मा·

ता ऽमुकी देवी तृप्यतामिदं जलं तस्मै ते स्वधा नम इत्येकमंजलिम्मात्रे दत्वा पितामही प्रपितामहीभ्यामेव २९

मेकैकमंजलिन्दद्यात् पितृव्यतत्पत्नीभ्रातृतत्पत्नीभगिनीमातुलमातुलीपितृष्वसृपितृष्वस्रीयमातृष्वसृमा-
तृष्वस्रीयमातुलेयादिपितृमातृसपिण्डेभ्य एकैकमंजलिन्दत्वा समानोदकसगोत्राचार्यश्वशुरर्त्विक्‌शिष्या-
याज्यादिभ्यस्सवर्णेभ्य एकैकमंजलिन्दत्वा येवान्धवावान्धवावा यवावा येऽन्यजन्मनिवान्धवाः तेतृप्तिमखि-
स्त्रा लायान्तुयस्त्वास्मत्तोभिवाञ्छतीतिमंत्रेणमुख्येकमञ्जलिम्प्रक्षिप्य येकेवास्मत्कुलेजाताअपुत्रागोत्रिणो
मृताः तेगृह्णन्तुमयादत्तंवस्त्रनिष्पीडनोदकमितिमंत्रेण स्नानवस्त्रन्निष्पीड्य यज्ञोपवीतीभूत्वा तर्पणा-
र्थंकुशान्परित्यज्यावम्यजलेब्रह्मादीन्देवानावाह्य यथासंभवमुपचारैर्ब्रह्मविष्णुरुद्रसवितृमित्रवरुणांस्त-
ल्लिंगैर्मन्त्रैरर्चयेत् तद्यथा ब्रह्मयज्ञानमित्यमंपुरस्तादितिमन्त्रेण प्रजापतिदृष्टयात्रिष्टुभाब्रह्मदेवतयाह-
भ्योपस्थानेविनियुक्तयाब्रह्माणमावाहनाद्युपचारैरभ्यर्च्येदंविष्णुरितिमेधातिथिदृष्टयागायत्र्याविष्णुदेव
त्रि

हृ. २०

तयासोमयागेदक्षिणस्यहविर्द्धानस्यदक्षिणयांवर्त्मन्यांहिरण्येपर्याज्यहोमेविनियुक्तयाविष्णुमभ्यर्च्यनमस्तेरुद्रम
न्यवइतिपरमेष्ठिदृष्टयागायत्र्यारौद्र्याशतरुद्रीयहोमेविनियुक्तयारुद्रन्नत्सवितुरितिविश्वामित्रदृष्टयागायत्र्या
सवितृदेवतयाऽग्निहोत्रगार्हपत्योपस्थानेविनियुक्तयासवितारंमित्रस्यवर्षणीधृतइतिप्रजापतिदृष्टयागायत्र्या
मित्रदेवतयायजमानोयायाश्रुवणप्रक्षेपणेविनियुक्तयामित्रंमिमम्मेवरुणेतिप्रजापत्याश्विसरस्वतीन्द्रदृष्टयागा
यत्र्यास्त्रयोनिग्राह्यग्रहणेविवारुण्यासौत्रामण्यांविनियुक्तयावरुणमर्चितोस्यायाट्टश्रमस्यकेतवइतिसूर्यदृष्ट
यागायत्र्या नियुक्तयाहं० सध्रुविषदितिगोतमपुत्रवामदेवदृष्टयाऽतिजगत्यासौर्ययाराजसूयेरथारोह
स्ययजमानस्यावरोहणेविनियुक्तयावसूर्यमुपस्थायप्रदक्षिणमाहतप्राच्यैदिशेनमइतिप्राचीन्दिशान्नमस्कृत्य
तद्दिग्देवतामिन्द्रायनमइतिप्रणम्याग्नेय्यैदिशेनमः अग्नये० दक्षिणायैदिशे० यमाय निर्ऋत्यैदिशे० निर्ऋत २०

ये॰ प्रतीच्यै॰ वरुणाय॰ वायव्यै दिशे॰ वायवे॰ उदीच्यै दिशे॰ सोमाय नः ऐशान्यै॰ ईशानाय॰ ऊर्ध्वायै॰ ब्रह्मणे॰ अ
वाच्यै दिशे नमः अनन्ताय नम इति दिग्देवताभ्य नस्कृत्यापविश्य ॐब्रह्मणे नमः ॐअग्नये॰ ॐपृथिव्यै ॐओषधि
भ्यो॰ ॐवाचे॰ ॐवाचस्पतये॰ ॐ विष्णवे ॐमहद्भ्यो नमः ॐअद्भ्यो नमः ॐअपाम्पतये नमः ॐवरुणाय नमः इ
त्येकस्मै जलाञ्जलिं दद्यात् सेवर्वेसापयसेति परमेष्ठिदृष्टया त्रिष्टुभा तत्पूदेवतया दर्शपूर्णमासयागे पूर्णपात्रस्य
जलप्रतिग्रहे विनियुक्तयाञ्जलिनाऽऽपो गृहीत्वा मुखं विमृश्य देवागातुविद इति परमेष्ठिदृष्टया विराडनुष्टुभाय
त्तमनस्याधिदेवतया समिष्टयजुर्होमे विनियुक्तयाऽऽवाहनांगकर्मांगदेवता विसर्जयेत् इति मध्याह्निकस्नानप
द्धतिः अथ प्रातराह्निकम् तत्र ब्राह्मे मुहूर्ते प्रबुद्ध आत्मसार्थं विचिन्त्योत्थाय द्विराचम्य ततः सोपानत्कः सकमण्ड
लुर्नैरृत्यां दिशं गत्वा यज्ञियैस्तृणैरफालकृष्टां भूमिमन्तर्धाय दिवा सन्ध्ययोश्चोदङ्मुखो रात्रौ दक्षिणाभिमुखो द

क्षिणकर्णेकृतोपवीतीमूत्रपुरीषोत्सर्गंविधायगृहीतशिश्नोमौनस्यस्थानात्स्थानांतरेउपविश्यपाङ्क्षेप्रसृतिमा
हः त्रामृद्दंसव्येनपाणिनादायपाणौनिधायजलेनप्रक्षाल्यपुनर्दशकृत्वोमृज्जलैर्वामपाणिंप्रक्षाल्यसप्तभिर्दा
११ क्षिणंवैकयामृदाशिश्नंत्रिर्वामन्द्विर्दक्षिणम्पाणिंप्रक्षाल्योपायवद्धकच्छशुचौदेशेप्राङ्मुखउदङ्मुखोवोप
विश्यमृज्जलैस्त्रिभिःपादौकरौचप्रक्षाल्यत्रिरपोविकृताःफेनादिरहितावीक्षिताब्रह्मतीर्थेनाचम्यखा
निचाद्भिरुपस्पृश्ययथोक्तदन्तधावनविधिंविधायगृहमागत्यस्नानोपकरणान्यादायनद्यादिजलाशयंग
त्वोक्तविधिनास्नात्वावासःपरिधायाचमनानंतरम्पूर्ववत्प्राणायामत्रयंकृत्वासूर्यश्चमेतिनारायणऋषिःसू
र्योदेवतागायत्रीछन्दआचमनेविनियोगइत्यभिधाय सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृते
भ्यःपापेभ्योरक्षंताम् यद्रात्र्यापापमकार्षम्मनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्नारात्रिस्तदवलुम्पतुयः २१

किं विदुरितम्मयि इदमहममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहेति मन्त्रेण सकृदाचम्य स्मार्तमाचमनं कृत्वा मार्जना
द्यघमर्षणान्ते सोदकांजलिमुत्थाय प्राङ्मुखोंजलिमादित्य ततः पूर्ववद्गायत्रीं जपित्वा प्रदक्षिणमावृत्य भगवन्ते
सवितारं नमस्कृत्योपविश्य देवागातुविद इति विसर्जयेत् सायंसन्ध्यायामनुप्राणायामान्तेऽग्निश्चमेति नारा
22 यण ऋषिर्गायत्र्युपरिष्टाद्बृहती छन्दोऽग्निर्देवताऽचमने विनियोग इत्युक्त्वाऽग्निश्चमेत्यादि पूर्ववत् यदन्हापा
पमकार्षमित्यादि पूर्ववत् अहस्तदवलुंपत्वित्यादि सर्वं · सत्येज्योतीत्यादि स्वाहेत्यंतमत्र पठित्वाऽऽचम्य मार्जना
घमर्षणान्ते सोदकांजलिमुत्थाय प्रत्यङ्मुखोंजलिमादित्य प्रांजलिः पूर्ववदुपविश्य यावन्नक्षत्रोदयं गायत्रीं
जपित्वोत्थाय प्रदक्षिणीकृत्य नमस्कृत्योपाविश्य देवागातुविद इति विसर्ज्जयेत् इति श्रीमिश्राग्निहोत्रिहरिहर
विरचिता कात्यायनस्नानविधिसूत्रव्याख्यानपूर्वकस्नानपद्धतिः समाप्ता ॥ शुभमस्तु हरिः ॐ सं· ४९ ७२॥ २२

वासुदेवपद्धति
हरिहर
विश्वनाथ